# Shri Kamalamba Navavarana Stotram

# શ્રીકમલામ્બાનવાવરણસ્તોત્રમ્

## Document Information

Text title : Kamalamba Navavarana Stotram

File name : kamalAmbAnavAvaraNastotram.itx

Category : devii, puShpAshrIvatsan, devI

Location : doc_devii

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Latest update : October 12, 2021

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

October 12, 2021

*sanskritdocuments.org*

# શ્રીકમલામ્બાનવાવરણસ્તોત્રમ્

। ૐ ।

શ્રીરામજયમ્ ।

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ॥

ૐ શ્રીચક્રિણ્યૈ ચ વિદ્મહે । હ્રીંબીજાયૈ ચ ધીમહિ ।
તન્નૌ માતા પ્રચોદયાત્ ॥

અથ શ્રીકમલામ્બાનવાવરણસ્તોત્રમ્ ।

નવાવરણચક્રેશિ શ્રીમાતઃ કમલામ્બિકે ।
શ્રીદીક્ષિતાર્યસઙ્ગીતે સઙ્ગીતકવિતાપ્રિયે ॥ ૧॥

તોડીરાગકૃતિધ્યાતે કરરામશુકારમે(૧) ।
કમલાલયતીર્થેશિ કરુણારસપૂરિતે ॥ ૨॥

અરુણોદયસંકાશે તરુણારુણસત્પદે ।
અખણ્ડાનન્દસમ્પૂર્ણે પરમાનન્દમુક્તિદે ॥ ૩॥

આનન્દભૈરવીરૂપે તામસાસુરમર્દિનિ ।
ત્રૈલોક્યમોહનાવાસે ચક્રેશ્વરિ નમોસ્તુ તે ॥ ૪॥

પાર્શ્વસ્થકમલાવાણિ નિત્યકલ્યાણિ યોગિનિ ।
સર્વાશાપરિપૂરશ્રીચક્રવાસિનિ હંસિનિ ॥ ૫॥

શઙ્કરાભરણે શક્તે મૂકવાગ્વરદાયિનિ ।
ચક્રસંક્ષોભણાકારે શોકાપોહપદામ્બુજે ॥ ૬॥

કામ્ભોજચરણે પૂર્ણે સર્વસૌભાગ્યદાયિકે ।
હિમવત્તનુજે ગૌરિ હ્રીંકારમન્ત્રપૂજિતે ॥ ૭॥

ભૈરવીકીર્તનાનન્દે પરે સર્વાર્થસાધિકે ।
બહિર્દશારચક્રસ્થે દશશક્તિનમસ્કૃતે ॥ ૮॥

પરમાદ્વૈતસંસ્ફૂર્તે સચ્ચિદાનન્દરૂપિણિ ।
નાદરહસ્યમર્મજ્ઞયોગિવૃન્દસુરક્ષણે ॥ ૯॥

સર્વરક્ષાસુચક્રેશિ સઙ્ગીતરસિકે શિવે ।
વેણીજિતસુપુન્નાગવરાલિ વર્ણમાતૃકે ॥ ૧૦॥

પાણીધૃતેક્ષુકોદણ્ડપાશાઙ્કુશસુમશરે ।
વાણીસંમૃદુમાધુર્યે એણીકટાક્ષવીક્ષણે ॥ ૧૧॥

સહાનારાગસઙ્ગીતે સર્વરોગહરે વરે ।
પરાદિવાક્સ્વરૂપાર્યે નિરામયવરે પરે ॥ ૧૨॥

હ્રીંકારમન્ત્રગુપ્તાર્થે હ્રીંકારમન્ત્રરૂપિણિ ।
વાણીલજ્જિતવીણાર્યે વીણાસુનાદવાદિનિ ॥ ૧૩॥

મુક્તિઘણ્ટારવાવાસે શ્રીકમલામ્બિકે શિવે ।
અખણ્ડૈકરસાવાહે સર્વસિદ્ધિપ્રદાયિકે ॥ ૧૪॥

આહિરીરાગસન્નૂતે સર્વાનન્દમયેશ્વરિ ।
કાદ્યાદિમન્ત્રરૂપે શ્રીમહાત્રિપુરસુન્દરિ ॥ ૧૫॥

શ્રીમાતઃ શ્રીપુરાન્તસ્થચિન્તામણિગૃહસ્થિતે ।
બ્રહ્માનન્દપ્રકાશે શ્રીરાજરાજેશ્વરિ શુભે ॥ ૧૬॥

શ્રીચક્રેશ્વરિ માતઃ શ્રીલલિતે ભુવનેશ્વરિ ।
શ્રીરાગરાગસઙ્ગીતે રાજયોગિનિ સૌભગે ॥ ૧૭॥

સઙ્ગીતવરદે માતઃ સઙ્ગીતરસમઞ્જરિ ।
સઙ્ગીતશ્લોકસાન્નિધ્યે નમામિ પરદેવતે ॥ ૧૮॥

મઙ્ગલં કમલામ્બાયૈ શ્રીચક્રેશ્યૈ સુમઙ્ગલમ્ ।
નવાવરણગેયાયૈ શ્રીકર્યૈ શુભમઙ્ગલમ્ ॥ ૧૯॥

અનુરાગકૃતં સ્તોત્રં બાલાલાપં તવાર્પણમ્ ।
સ્વીકુરુષ્વ મદમ્બે શ્રીર્ગાનવરં પ્રદેહિ મે ॥ ૨૦॥

ત્યાગરાજગુરુસ્વામિશિષ્યાપુષ્પાસુગીતિકમ્ ।
નવાવરણસુસ્તોત્રં કમલામ્બાકૃપાવહમ્ ॥ ૨૧॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા કૃતં
શ્રીકમલામ્બાનવાવરણસ્તોત્રં ગુરૌ સમર્પિતમ્ ।

ૐ શુભમસ્તુ ।

Footnote :
(1) delighting in the parrot in hand repeating “RAma RAma"

Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*Shri Kamalamba Navavarana Stotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on October 12, 2021
Please send corrections to *sanskrit@cheerful.com*